क्लिष्टेन मया पूर्वं संस्कृता व्याख्या मतमालोक्य तत्त्वतः ९ पश्यंतु साधवः सर्वे हृष्यंत्व
षण्णां मम न हानिः साधुवदने हृष्यंतां मत्सरा भवेत् १० श्रीरामरक्षाव्याख्यासंग्रहः तावत्
च्छ्रीरामरामायणे रामरक्षावतारप्रयोजनकल्पनाप्यवतरणिका ज्ञेया अथ सर्वलो
कनिवासः सकलब्रह्मनारायणविष्णुवासुदेवादिशब्दवाच्यो भगवान् श्रीरामः स
र्वलोकशिरोमणिमणिमयानापिकानंतैश्वर्यसंपन्नायोध्यायामवतरत्तस्या
यां रत्नोज्ज्वलमरचितपद्मरत्नासने श्रीमल्लीलाभिर्नित्यमुक्तस्वरूपैः स्वभावो भवैः श्री
सौमित्रिमारुतिप्रभृतिस्वाधिनामभिते रूपास्यमानो लौकिकपाप्यलौकिकलीलया
वाप्तकामः स्वात्मारामः सदानंदो दयासिंधुर्दीनबंधुरानंदकंदो भक्तापवर्गो
इति हृष्यन्नेवास्मिन्नर्थे पूर्वसंस्कृताः प्रबंधाः तथा च श्रीगोविंदाचार्यैः श्रियः
पतिरवाप्तसमस्तकामः समस्तकल्याणगुणात्मकः सर्वेश्वरेश्वरो वैकुंठे तु परे
लोके श्रिया सार्द्धं जगत्पतिः आस्ते विष्णुरचिंत्यात्मा भक्तैर्भागवतैः सहास्ते

ए.र० २

करोत्या श्रीवैकुंठाख्ये दिव्यलोके महामणिमंडपे श्रीभूलीलाभिः संह रत्नसिंहासनमध्य
मध्यासीनो नित्यैर्मुक्तैश्च सह निरंतरं परिचर्य्यमाणचरणनलिनोपि तदेव स्वचरणयु
गलपरिचर्य्याहीनपि तद्धीनात्मलये प्रकृतिलीलानमध्ये च्छिन्नमग्न हिमकणसदृशा
नक्षीणज्ञानान् भोगमोक्षशून्यान् जीवानवलोक्य एवं संसृतिचक्रस्य भ्राम्यमाणान् स्व
कर्मभिः जीवदुःखाकले विष्णोः कृपाकाष्ठुप्रजाते तदुत्तारोत्पादयमानमनाः वि
चित्रादेहसंपत्तिरीश्वराय निवेदितुं पूर्वमेव कृता ब्रह्मानहस्तपादादिसंयुतादस्युक्त
प्रकारेण महदादिसृष्टिक्रमेण तेषां स्वचरणकमलसमाश्रयणोचितानि करणक
लेवराणि दत्त्वा नदीतरणपदत्तैः शास्त्रैर्नदीरपाणुसारेण सागरमवगाहमाने। ष्विवतेषु
विषयांतरप्रवणेषु तेषां सदसद्विवेचनाय शास्त्रमनान्यशास्त्रं मिथ्याकरोत्पासस्वयमेस
नरूपं वेदाख्यं शास्त्रं प्रवर्त्य तस्मिन्न प्रतिपत्तिविप्रतिपत्त्यन्यथाप्रतिपत्तिभिस्तिरनार राम:
तेस्व शासनातिलंघिनं जनपदं स्वयमेव साधयितुमभिप्रियासुरिव वसुधाधिप २

ति:स्वाचारमुखेनतानशिक्षयितुंचतुर्व्यूंवतारेतिश्रीरामावतारप्रयोजनम् तत्ररा
मरूपेणावतीर्य्यरावणंनिहत्यपितृवचनपरिपालनादिसामान्यधर्ममनुतिष्ठन्ल
क्ष्मणरूपेणरावणिंनिरस्यभगवच्छेषत्वरूपविशेषधर्ममभरतरूपेणगंधर्व्वान्निर्वी
ष्यभागवत्पारतंत्र्यरूपंप्रपन्नधर्मरूपेणलवणासुरंध्वंसयित्वाभागवतशेषत्वंतानिमा
न्धर्मानतानिमानिचावचरितपदानि तत्कालमात्रपर्य्यवसितानिभविष्यंतीति
मत्वानःसर्वलोकहितपरःपितामहोभगवान्ब्रह्मारामचरितपवित्रितंशतकोटिग्र
विस्तरंप्रबंधंनिर्मापितंनारदादिनध्याप्यमर्त्त्यलोकेपिसंततराममंत्रानुसंधानुसंधृतहित
हृदयवाल्मीकिमुखेनसंग्रहेणप्रवर्त्तयितुंनारदंप्रेषयामासेतिश्रीरामायणावत
रणम् अथश्रीराममंत्रावतरणं श्रीमद्रामभद्रावतारेश्रीमद्रामायणावतारे खि
लभागवत्तारम मौवर्तमाने चिन्मयेस्मिन्महाविश्लेजातदशरथगृहे रघोःकुले
खिलराजेतिरजितेपामहीस्थित इत्युक्तप्रकारेणश्रीरामरामायणरामभक्तिपरि

रा०र० पूर्णमनस्कभक्तचरितैः परिपूर्णोभूः कामधेनुकल्पतरुकामदस्मणिमपीसर्वेदासर्वत्र

२ सर्वर्त्तुकानंदसंदोहोहारवसमत्तु यथाततः प्रभृतिनंदस्यव्रजः सर्वसमृद्धिमान्

हेर्निवासात्म्गुणैः रमाक्रीडमभूत्स्वल्पइस्युक्तप्रकारादप्यधिकानंदपूर्णोतत्रनंद

स्यव्रजइत्येकस्यव्रजस्यरमाक्रीडंवैकुंठतद्रूपताजाताअन्यत्रकंसादिकृतानंदसंरोध

कृतापित्तिकंसुखंस्पत्तिनाव्यपतीतिकंसः देशांतरेवजरासंधकालयवनदंतवक्रचैद्य

कमस्यवती अपराचद्रपौधनादिप्रकृतिराहुंसेः तद्दुपाश्रेतेचपादस्वाणेविभया

तद्दृष्टेवश्रीहरिणाविरहिताहरिंप्रणविवती अत्रतुश्रीरामावतारसमंतरमेवदशा

रथपुरजनपरिजनामानपदाः प्रजाश्चआनंदपूर्णाः मुजावहुत्पभेरीघोषणघोषपि

त्वाहारामावतारोजातोदिविदेवाश्चदुंदुभयोनेदुरित्येवंदिविभुव्यानंदंपर्यपिलात्तः

वाल्यकौमारकिशोररसैस्तत्तंद्रसानरसमोत्कुं स्वतोपपितास्वयंसंतुष्टः स्वजनानं रामः

दनाय श्रृंगारवीरकरुणाद्भुतवीभत्सभयानकरौद्रशांताः स्वस्मिनभिव्यंजयन् २

आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनं रक्षिष्यतीति विश्वासः गोप्तृत्ववरणं तथा
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिरिति दर्शयन् ताडकाताटकेयवधं विश्वा
मित्राध्वरत्राणमहिल्योद्धरणं हरधनुर्भंग परशुरामनिग्रह श्रीयोगसंपादनायोध्या
गमन पितुराज्ञया तमसा गंगा प्रयाग चित्रकूटात्रिधर्मपत्न्यनुसूयाप्रसंगसु
तीक्ष्णागस्त्यजटायुशबरीमारुतिसुग्रीवमैत्रीवालिवधसालनिर्भेदनसेतुबंधस
लवलरावणकुंभकर्णेंद्रजिदादिराक्षससमूहापध्वंसपिल्वानंतैश्वर्याच्चपेमपी
श्रीभल्लोत्लाभिः सहाकाशचारिणा कामगेन पुष्पकेनाकाशविलाससामर्थ्ये दर्शि
यन्नयोध्यां श्रीमद्राजधानीमागत्य पत्न्यानंतवैभवालंकरणाभरणास्वरूपानंदय
तरौ रतीव पवित्रचरित्रैः एमारामो राम इति प्रजानां समभूद्ध्वनिः एवमभूतमिंद्रवि
भवं रामे राज्यं प्रशासति तत्पानंदसंप्लवसमग्रं जगदासीत् अथाभिषिक्तस्य राज्ञः प्रजापा
लनं परमो धर्म इति धर्मसाधनार्थं व्यवहारान्स्वयं पश्यन्संप्रेषितः परिहृत्तोन्नहमित्याचार

रा॰र॰
५

श्रेन्वतिष्ठन् एवं चदुष्टनिग्रहमंतरा शिष्टपालनं न भवतीति महाराक्षसौकरणेनेंद्रादि
दिग्देवान्स्वस्वाधिकारे संस्थापनेन च दिव्यानंदं संपाद्य एवमेव भूमावपि पत्रयंत्रया
दृष्ट्या योग्यता तत्र तत्र तादृशानंदसंपादनमकरोत् यथा तिनिपुणधिषणः कृषी
वलः पाषाणपापभरुहाच्छादितामतिदुःसंभूमिकां विकृताकारां निरन्नभूतां परशु
द्वदाहनादिना कंटकादि मनिर्मलयित्वा हलफालकद्दालैः संप्रोक्ष्य तत्रा सत्र वना
रोपणं करोति तद्वच्छ्रीरामो राक्षसनिर्मलतानंतरमनेकराजवंशस्थापनसेतुक
ल्पकूपकासारतडागारामारोपराजमार्गमंडनैर्महीमलंकृतां कृत्वा नाना यागो
द्योगैर्महोत्सवमापाद्य कृतकार्यत्वात् कृतकृत्योपि भूत्वाति सर्वस्य दर्शनाद्दूरद
र्शनानागतकालमालक्ष्य स्वांते किमपि शून्यतामनुमानेनानागतकालज्ञो वा भूतभ
क्तानंदमहोत्सवः कथं भवेदिति सरूपार्थेवक्ष्यति श्यायां विदेहजामयोनिजामे
कांते मंत्रराजमुपदिदेश ततोवतारप्रयोजनं संपूर्णं कृतवानस्मीति संतुष्टोवि

राम:
५

हारैर्विजहारेति श्रुत्यसरिवृत्तप्रबंधोल्लेखः तथाहि अयोध्यानगरे रम्ये सर्वलोकस्यका
रणे रमया सहितो रामोध्यास्ते भागवतेः सह उत्पकरीत्या अयोध्याधिपतिः तस्यां महा
मणिमंडपकल्पवृक्षछायायां रत्नसिंहासने सुखासीनो वाङ्मनसापरिच्छेद्यस्वरूप
रूपविभवैश्वर्यस्वभावः स्वाभाविकज्ञानबलैश्वर्यवीर्यतेजः प्रौशील्यवात्सल्यमा
र्दवार्जवसौहार्दसौम्यकारुण्यमाधुर्यगांभीर्यौदार्यस्थैर्यधैर्यसत्यपराक्रमस
त्यकामसत्यसंकल्पकृतित्वकृतज्ञताद्यसंख्येयकल्याणगुणगणौघमहार्णवः रा
वणादिहननद्वारेणासकलजंतूनां नयनविषयतां प्राप्यापनागताखिलचेतनोज्झि
तो विषयाः श्रीजानकीरुहृद्गगमहिपरं परयावनितालिंड मंत्रह्मतारकं मंत्रराजं प्रकाश
यामास उक्तं चास्य तारकत्वं मुनिभिः इममेव परं मंत्रं ब्रह्मरुद्रादिदेवताः ऋषयश्च
महात्मानो मुक्ता जप्त्वा भवांबुधेः १ एतन्मंत्रमगस्त्यो विजप्त्वा रुद्रत्वमाप्नुयान् ब्र
ह्मलोकापूपयो जप्त्वा कौशिकत्वमेरथ्यातां २ कार्तिकेयो मनुश्चैव चंद्रार्कं गिरिनार

रा॰र॰ दाः वालखिल्यादिमुनयोदेवतात्वंप्रपेदिरे ३ इममेवजपन्मंत्रंरुद्रस्त्रिपुरदाहकः
ब्रह्महत्याविनिर्मुक्तः पूज्यमानोमरुत्सुरैः ४ इत्यवतरणिकात्राचार्यानुगामीस्वा
५ नशेषशेषित्वंचशेषश्रीसुदर्शनशंखादीनांभावमानोभगवतिभगवदीयानांभा
वनारहस्यानिसंसेव्यमानः श्रीरामेपरतत्वनिघ्नोभरतचिदेकरसस्यापारपार
वारस्वरूपश्रीसीतालक्ष्मणभरतादीनांस्वगतस्वात्मस्वरूपाण्येतद्यात्वंमन्यमानः
एवंशरीरस्येरणासरणातयाशंकेतचेत्कथमुक्तमद्रव्यक्तातिशयांस्पत्ताप्यधिकामि
तितत्राप्येत श्रीरामोपासिकैः श्रीरामः परतत्वात्मासात्मारामः अवाप्तसमस्त
कामः घनीभूततेजः पिंडपिंडः उपास्योत्र ऋषिः अन्तस्तंवतल्लोकायमज्ञानाद्य
दित्यत्ति राममनाम्निपरंतेजोतपतीवदिवाकरइति स स्वरूपेरंतुकामः सएका
कीनरमेतद्वितीयामैच्छत् पत्निश्चपत्नीचाभवतांलीलारसास्वादसंपादनायद्व रामः
योर्भागयोर्दक्षिणांगवामभागयोर्दक्षिणोदक्षिणोवामोवामश्चावतरतिस्म क्तिद्व ५

यात्मैकतत्त्वस्वरूपः क्वचिद्गुणभागस्याधिक्यं क्वचित्साम्यं न निषिद्धं श्रीविभक्तस्व
रूपत्वात् यथाऽनन्या हि मयासीतेत्यादि अनन्या राघवस्याहं भास्करस्य प्रभा य
थेत्य विभक्ता च अपि कल्पे चाश्रितरक्षणादि गुणैः षड्विध यथा श्रीरामस्याश्रितदोषदर्श
नेऽपि संरक्षणं दृश्यते दोषो यद्यपि तस्य स्यादित्यादि श्रीसीतायास्त्वदोषदृष्टे
वदृश्यते यथा पापानां वा सदेषकाणां वधार्हाणां प्लवंगम कार्यं करुणमार्य्या
नकुः श्रीलापरत्वं तीत्यादावाराधाधिक्यं श्रीलक्ष्मणाद्विभागोऽपि स्वस्वामिभावभा
वनामेव भावुकानुभावयन् लीलासाह्यं संपादनेन पराक्रमते यथा भवांस्तु स
ह वैदेह्या गिरिसानुषु रंस्यते अहं सर्वं करिष्यामीत्यादि रहस्यं परमात्मनो राम
चंद्रस्य प्रकृतिपरस्य एकाद्वैताभिधानतत्त्वस्य तत्त्वत्रिधास्थिति संपादनाय क्वे
धा भेदो भवति आदौ श्रीमन्नारायणात्मभेदे शक्तिस्वरूपवाहनादिसेवारूपः
स गतभेदो वहुधा लक्ष्मणेति तन्नाभिपद्मनालाच्चतुर्मुखो ब्रह्मा सोऽपि स्वागतभे

रा०र० दैर्नारदसनकादिभिर्विततेतानंतरावतंसालफालफलितो भगवान्प्रभुः स्वयंभूरात्मजो
६ जातस्तस्यापिशक्तिशस्त्रवाहनादिसेनाकल्पना यापुंस्त्रीकल्पना याचव्यवस्थासंयोजनी
या यथा चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः उपासकानांकार्यार्थंब्रह्मणोरू
पकल्पना रूपस्थानांदेवतानांपुंस्त्र्यंगास्त्रादिकल्पना द्विचत्वारिंशदष्टानांदशाष्टा
दशाष्टादशा अष्टादशापिकथिताहस्ताः शंखादिभिर्युताः सहस्रांतास्तथातासांवर्ण
वाहनकल्पना शक्तिसेनाकल्पनाचब्रह्मण्येवहिपंचधा कल्पितस्याशरीरस्यत
स्यसेनादिकल्पनाइत्ति रामएवपरंब्रह्मसच्चिदानंदविग्रहोयोनित्योनानारूपः ए
वंस्थितेश्रीरामापरमतत्त्वोपासनपरमात्मैकतत्तापासीनसिद्धांतवाक्यान्यवतर
ति नरामतत्त्वइत्यनवद्यम् कापक्करणाम् श्रीरामरक्षावतारोऽयंस्फुटोभविष्यति
ॐरामायनमः श्रीशिवोविश्वामित्रायाहध्यायेति यःप्राज्ञएतत्सर्वंभेयमयत्नतो रामः
नापासनहेतुमिच्छतिसरामरक्षांपठेदितिसंबंधः प्रज्ञएवप्राज्ञःधीःप्रज्ञाशेमुषीम ६

तीत्यमरः सास्यस्मिन्निति प्रज्ञस्ततः स्वार्थेमत्वर्थीयोऽण् प्राज्ञ इति प्रोत्साहनायोक्तिः स
बुद्धिमान्मनुष्येष्विति वचनात् स एव प्राज्ञो यो ऽमररक्षांपेक्षते अत्र पूर्व इति पञ्चम्या
दनिर्दिष्टो ये ऽपि के ऽपीति प्राज्ञा यतो ऽयत्नेनाभयमिच्छवः अत एव चतुर्विधा भजन्ते मां
जनाः सुकृतिनोऽर्जुन। आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ इत्यत्र चतुर्णामपि
सुकृतित्वप्रतिपादनादत्र प्राज्ञ इति प्रोत्साहनं सुवचत्वं नहि प्राज्ञ एवेति नियमः क
र्तुं शक्यते यतो ऽयत्नत इत्युक्तं प्राज्ञो ऽभयत्वाय यदि रक्षांपेक्षते तदा दोषवत्सहानायासाय
त्वं कृतो भवति प्राज्ञस्य यत्नसाध्यत्वात् रक्षायाश्च स्वतन्त्रफलत्वात्तेनान्यनिरपे
क्षत्वात् उक्तं हि नेदृशं दानं न च दक्षिणां न च प्रस्त्वर्यमिनागीष्यते मंत्रायं रसनास्य
गवफलति श्रीरामनामात्मकः १ न देशनियमस्तत्र न कालनियमस्तथेत्यादिवचना
दत्राभयमिच्छुरधिकारी एतद्द्वयमित्येतत्र च वक्ष्ययोगस्यातिक्रमो यतस्त्रिवर्तते मा
नकालता चोद्यात् एतदर्थे प्रमाणं कारिका इदमन्तु सन्निरूप्य समीपत्तव तिचैत्तदारूप

रा॰ अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् इति समीपतरवर्तित्वं वर्तमानकाल
ताच शतं त्मत्तवः सोहं भ्राजापतेत्मत्सः सहैव प्रलीयते अथवा दृश्यतां तेवास्मत्सैर्व
७ प्राणिनां ध्रुव इति सर्वेमिति मयसमानाधिकरणत्व श्रुत्या ध्याव अस्मद्याभावे ध्या-
वो ध्याहं तु मिच्छतीति ध्यामेव करोति न लिच्छानंतरं प्रपतत्ते पतोपलक्षितस्य
कं न च निरूपपदस्य पस्यापूरणे त्वादुं तेधीतो स्वप्राणवियोगानुकूलव्यापार
येत्वादसंभव इति वाच्यं मयस्यात्यंताभावच्छायाः संभवात् अथास्याधिकारि-
णमिति कर्तव्यता रामं ध्यात्वेति ध्यानानुज्ञयाशिरः स्नानादिकृत नित्यनिर्वा-
हस्य मंत्रस्य शुद्धिप्राणप्रतिष्ठामंत्रजपादीनामुपलक्षणम् अथ मंत्रशुद्धिर्येया
तत्करणप्रकारस्तु शारदातिलके मंत्रशुद्धिं ततः कुर्यात्तत्प्रकारोऽधुनोच्यते
पादतो जानुपर्यंतं चतुरस्रं वज्रकलायुतं पीतवर्णं च भुवः स्थानं विचिन्तयेत् ॥ राम:
जान्वोरानाभिचंद्रार्द्धनिभं पद्मेनलांछितं शुक्लवर्णं स्वबीजनयुतं ध्यायेदयां ७

स्थलं नाभितः कंठपर्यंतं त्रिकोणं रक्तवर्णकं सस्वस्तिकं स्वबीजेन युतं वन्हेस्तु मंडलं
कंठाद्भ्रूमध्यपर्यंतं कृष्णं वायोस्तु मंडलम् षट्कोणं बिंदुभिः षड्भिर्युतं बीजेन चिंतयेत्
भ्रूमध्याद्ब्रह्मरंध्रांतं वर्तुलं ध्वजलांछितं धूम्रवर्णं स्वबीजेन युतं ध्यायेन्नभस्तलं एवं
ध्यात्वा पुनस्तानि भूतानि प्रविलापयेत् पृथ्वीमप्सु च ताश्चैव वन्हौ वन्हिं वायौ समीरणं॥
प्रविलाप्य तथाकाशे प्रकृतौ तत् ततः अपरब्रह्मरूपां तां मायाशक्तिं परात्मनि इत्थं स
मस्तदेहादिप्रपंचं परमात्मनि प्रविलाप्य परं ब्रह्मरूपस्तिष्ठेत् किंचित्क्षणं पुनरुत्पादये
द्देहं पवित्रं परमात्मनः शक्तिर्ब्रह्मात्मिका जाता प्रकृतिः परमात्मनः अजायत जग
न्मातुराकाशं नभसोऽनिलः समीरणाच्च दहनो वन्हेरापस्ततो मही स्वापमभ्योपिभू
तेभ्यस्तेजोरूपं कलेवरं देवताराधने योग्यमुत्पन्नमिति भावयेत् तस्मिन्देहे परात्मा
नं सर्वज्ञं सर्वशक्तिमत् समस्तदेवतारूपं सर्वमंत्रमयं शुभम् आत्मरूपेण देहस्य
बीजभावेन तिष्ठति इत्येषा भावना मुख्या भूतशुद्धिर्विधीयते धर्मकंदसमुद्भू

तं ज्ञाननालं सुशोभनम् ऐश्वर्याष्टदलं चैव परं वैराग्यकर्णिकम् स्वीयहृत्कमलं ध्यायेत्
प्रणवेन विकाशितम् तत्कर्णिकासंस्थं प्रदीपकलिकाकृतिं सुषुम्णावर्त्मेना
तं च परमात्मनि योजयेत् योगयुक्तेन विधिना सोहंमंत्रेण साधकः तत्रैव सर्वं तत्वा
नि विलीनानि विचिंतयेत् पुरुषाभं ततः पापमनादिभवसंचितम् ब्रह्महत्याशिर
स्कं च स्वर्णास्तेयभुजद्वयं सुरापानहृदायुक्तं गुरुतल्पकटिद्वयम् तत्संयोगिप
दद्वन्द्वमंगप्रत्यंगपातकं उपपातकरोमाणं रक्तश्मश्रुविलोचनं खड्गचर्मधरं क्रु
द्धं कुक्षौ दक्षिणतः स्मरेत् ततः संशोधयेद्देहं पूरकादिक्रमेण वै विधाय प्राण
संरोधं वायुवीजेन वायुना वह्निवीजेन तेनैव सदेहं तं सकलां तनुं भस्मतद्भागेण मा
र्गेण निर्गतं चिंतयेत् सुधीः ततो वमिति वीजेन प्लावयेत् सकलां तनुं संजातनिर्म
लं देहं देवतोपासनक्षमे आत्मा जीवाख्य तत्वानि स्वस्थानं प्रापयेत् ततः आत्मानं हृ
दयाम्भोजमाने यत्परमात्मनः हंसमंत्रेण विधिवद्देवा वर्ण्यं विधायते भूतशुद्धि

विहीनेनकृतापूजाभिचारिका विपरीतफलंदद्याद्भक्त्यापूजनंसदा भक्तश्रद्धि
विधायेत्थंततोविद्यापंचदशाक्षरान् पाशांकुशान्प्रदित्त्वाशक्तिमादौसमुच्चरेत् प्रका
रादिसकारांतान्विंदुमस्तकलांछितान् तदंतउद्धरेत्स्वाहासोमामेंद्वंद्वसंपुतं ततो
हंसपरात्मानोततोऽमुष्यपदंवदेत् प्राणाइतिवदेत्पश्चाद्दिहप्राणास्ततःपरमत्र
मुष्यजीवइहतुस्थितोऽमुष्यपदंततः सर्वेंद्रियाण्यमुष्यांतेवाङ्मनश्चक्षुरंततः
श्रोत्रघ्राणपदेप्राणाइहागत्यसुखंचिरं तिष्ठन्तुगनिवधः पर्वप्रत्यमुखपदस्ववधः
पाशाद्यानिप्रयोज्यैवंप्राणमंत्रंसमुद्धरेत् ब्रह्मर्षिरस्यछंदस्तुविराट्प्राणास्तुदेव
ता प्रणोवाग्निवधूबीजंशक्तिरुक्तामनीषिभिः शिरोवदनहृद्गुह्यपादेष्वेषांविवि
न्यसेत् अमुष्यनिपदस्थानेसाध्यनामसमुच्चरेत् त्रिर्जपेत्साध्यसंस्पर्शकर्मणि
त्रमुदारधीः एषप्राणप्रतिष्ठायाःप्रकारःपरिकीर्त्तितः आंपाशःह्रींमायाक्रौं
अंकुशः तथाचागस्त्यसंहितायाम् हृदंबुजंब्रह्मकंदसंभूतज्ञाननालके

रा॰र॰ ऐश्वर्य्याष्टदलोपेतपरेवैराग्यकर्णिके आराग्रमात्रेजीवस्तुचिंतनीयोमनोषिभिः।

९ नेतव्योहंसमंत्रेणद्वादशांतस्थितःपरः तेनसंयोज्यविधिवद्भूतशुद्धिंसमाचरे
त् भूतानिनामपृथिवीजलंतेजोमरुद्वियत् पंचतेजायतेतस्मिन्प्रलयोत्पाद
नेपुनः शरीराकारभूतानांशुद्धियेशोधनंविदुः मरुदग्निसुधावीजैः पंचासन्मा
त्मात्रकं प्राणान्निरुध्यात्मदेहंशोधयेत्ततस्तुनदहेत् तंदेहंपुनराप्लाव्यप्रजी
वमिहानयेत् जीवनपुनरात्मानंचिंतयेत्पुरुषात्मये जीवस्यतत्वसिद्धैचतस्या
प्यात्मत्वसिद्धये नयनापनार्थंचहंससोहमितीरयेत् भूतशुद्धिरियंनामक
र्तव्यानामसायेकृत् भूतशुद्धिंविनायस्माज्जपहोमादिकाःक्रियाः भवंतिनिःफलाः
सर्वाःप्रकारेणाप्यनुष्ठिताः गृहोपसर्पणंचैवतथानुगमनंहरेः भक्त्याप्रदक्षि
णंचैवपादयोःशोधनंविदुः यन्नामकीर्तनंचैवगुणानामपिकीर्त्तनंभक्त्याश्री रामः
रामचंद्रस्यवचसःशुद्धिरिष्यते पूजार्थंपत्रपुष्पाणांभक्त्यैवातालनंहरेः कर ९

योः सर्वेषुद्धीनामिंयशुद्धिर्विशिष्यते तत्कथाश्रवणंचैवतस्यात्सवनिरीक्षणं श्रो
त्रयोर्नेत्रयोश्चैवशुद्धिसम्यगिहोच्यते पादोदकस्य निर्माल्यमालानामपिधारणं
उच्यते शिरसः शुद्धिः प्रणतस्यहरेःपुनः आघ्राणंगंधपुष्पादेरर्चितस्यतपोधन
विशुद्धिः स्यादनंतस्यघ्राणस्येहाभिधीयते पत्रपुष्पादिकंयच्च रामपादयुगा
र्पितं विशुद्धं तत्भवेत्सर्वस्यात्मनाधार्यते यदि इतिभक्तशुद्धिप्रकरणम् त्र
त्रश्रीराममंत्रजपस्याप्युपलक्षणात्तिलककरणप्रकारस्तु नित्याह्निके ॐकेशवा
यनमः ॐनारायणायनमः ॐमाधवायनमः ॐगोविंदायनमः ॐविष्णवे
नमः ॐत्रिविक्रमायनमः ॐमधुसूदनायनमः ॐवामनायनमः ॐश्री
धरायनमः ॐहृषीकेशायनमः ॐपद्मनाभायनमः ॐदामोदरायनमः
ॐनमोवासुदेवायनमः इतितिलकंकृत्वा प्रथमतः अपवित्रेतिमंत्रेण
शरीरप्रोक्षणासनशोधनंवायथासंभवंकुर्यात् ॐअस्य श्रीरामषडक्षर

मंत्रराजस्यब्रह्मान्नृषिःगायत्रछंदः श्रीरामःपरमात्मादेवतारांबीजंनमःशक्तिःरामा
यकीलकंश्रीरामप्रीत्यर्थेजपेविनियोगः ॐब्रह्मणेऋषयेनमः शिरसिॐगायत्र
छंदसेनमोमुखे श्रीरामायदेवतायेनमोहृदि रांबीजायनमःगुह्ये ॐनमःशक्त
येनमःपादयोः ॐश्रीरामायकीलकायनमःसर्वांगे इतिऋष्यादिन्यासः ॐरां
रींरूंरैंरौंरः ॐरांअंगुष्ठाभ्यांनमः ॐरींतर्जनीभ्यांनमः ॐरूंमध्यमाभ्यांनमः ॐरैं
अनामिकाभ्यांनमः ॐरौंकनिष्ठिकाभ्यांनमः ॐरःकरतलकरपृष्ठाभ्यांनमः इ
तिकरन्यासः ॐरांहृदयायनमः ॐरींशिरसेस्वाहा ॐरूंशिखायैवषट् ॐरैंकवचा
यहुं ॐरौंनेत्राभ्यांवौषट् ॐरःअस्त्रायफट् इतिहृदयादिन्यासः न्यासंकृत्वामूले
नैवत्रिराचमेत्मूलेनशिखाबंधः मूलेनैवकरशुद्धिः प्राणायामं पूरकं ३२ कुंभ
कं ६४ रेचकं १६ यथाशक्तिवीप्राणायामत्रयंकृत्वा अथध्यानं वैदेहीसहितंसुरद्रु
मतलेहैममहामंडपेमध्येपुष्पकमासनेमणिमयेवीरासनेसंस्थितं अग्रेवाचयति

प्रभंजनसुतेतत्तलं चमुनिभिः परं व्याख्यातं भरतादिभिः परिवृत्तं रामं भजे श्यामलं इति
ध्यात्वा जपं कुर्यात् षट्सहस्रं सहस्रं वा त्रिप्रातं प्रातमेव वा ततः समर्पणं कुर्या
त् पुंडरीकाक्ष विश्वात्मन् मंत्रमेतं जनार्दन गृहाणेमं जपं नाथ मम दीनस्य प्राप्य
तेति नमोस्तु रामदेवाय ज्योतिषां पतये नमः साक्षिणे सर्वलोकानां परमानंददा
यिने रघुनाथाय दिव्याय महाकारुणिकाय च नमोस्तु केशवानंददायिने ब्रह्मरू
पिणे नमस्ते मंदयासिंधो नमस्ते परमेश्वर नमस्ते जानकीकांत नमस्ते रघुनंदन इ
ति नमाम्यहं श्रीरामं संध्यासंहारमुद्रया विसृज्य हृदयागं तं विभाव्याचमेत् जपजय
श्रीजानकीरमणकरुणानिधे इति पुनः पुनर्वदेत् इति नित्यमंत्रसंध्या समाप्ता
इयं च रहस्यश्रीराममंत्ररूपातो पावद्रा ममंत्रफलप्रतिपादकत्वेति स्मृतिशास्त्र
समुदायपरत्वाविद्धा याप एव वोध्यम् अनुवंधसंबंधो प्येवमेव पुनश्चैपं रहस्यमंत्ररूपता
त्पूर्वमीमांसा श्रीरामब्रह्मस्वरूपनिरूपकत्वादुत्तरमीमांसा नीलोत्पलश्याममित्या

रा०र०

११

दिसमवायसंबंधविशिष्टविशेषणैः पदार्थस्वरूपनिरूपणात्कणादस्यायंभगवतोश्रीरामस्व
रूपरूपरूपध्यानज्ञानबोधनात्सांख्ययोगभूतातोवेदमंत्ररामायणार्थे विशेषत्वात्सर्वशा
स्त्ररहस्यमितिसर्वमनोहरमुक्त्वाविशेषणांप्रेत्तावस्थद्दत्तावरुच्यालस्याभावोनिष्ठनिव
र्तनिष्ठप्रायोराचस्फुटस्पष्टयति पापघ्नींसर्वकामदामिति विशेषणद्वंद्वेनरक्षानुगा
म्यानुषंगिकष्टसंपादनंफलत्वेनदर्शयतिएतामित्यादिनापापघ्नीमिति पापाःसंचित
क्रियमाणागामिवीजरूढत्वपापंचविधास्तान्हंतिनाशयतीतितथातां स्वपापिनामो
चारेणपापनाशोभवेत्येवत्स्यवेसंयं यद्वापापाःभगवद्भागवतापचाररूपाःवाब्रह्महत्या
दयउपपातकानामप्युपलक्षणंतान्हंतीति सब्रह्महत्यांतरतिसवीरहत्यांतरतिस
भ्रूणहत्यांतरतीत्यागमानुसंधानंमानं सर्वकामदामिति सर्वकामाश्चानुकूल्यसंक
ल्पाःसर्वकामास्तान्ददातीतिपासातां यद्वासर्वैःकाम्यतइति सर्वकामाश्चत्वारोयोध
र्मार्थकाममोक्षाख्यास्तान् यद्वासर्वेश्चकश्चत्रमदश्चेतसर्वकामदाःप्रियव्रह्महर

राम:

११

पस्तविद्यंतेपरंपरासंवंधेनपस्यांसातं। सर्वः शर्वः शिवः स्थाणुरित्यमरः कः प्रजापतिरु
द्दिष्टइत्येकाक्षरः नविद्यतेमदोयस्मिन्नित्यमदो विष्णुः हरिः कस्मैब्रह्मणेउपदिदेशसो
पिशिवायशिवोविश्वामित्रायेतिपरंपरासंवंधः पक्षेसर्वेकांश्रद्धामितिशेषः सर्वेकांसर्वेसंवं
धवतीं अकारोवासुदेवस्तंददात्युपदिशतीतिप्रदातं। पक्षेसर्वान्कामान्यतिखंडयती
तितम् पक्षेसर्वेस्यशिवस्येपकामाः श्रीरामस्वरूपानुभवानंदसंदोहसंकल्पास्तान्ददा
तीतितं। पक्षेसर्वेस्यशिवस्यकामः शत्रुस्तंघतिखंडयतीतितं श्रीमहेश्वरेणमनोजमर्द
नकोत्सहलमनयेवायादित्तमितिध्येयं पक्षेसर्वेस्यपादकमात्रजनस्याभयार्थेदात्रीमि
त्यर्थः पक्षेसर्वेस्यशिवस्यकांगंगेवशिरसिभ्राजमानातं ग्रामदंग्रामंग्रामघ्नंपती
तितं पक्षेसर्वेकाचासावामदाउत्तपक्षानामविपक्षकषायाणामपीच्छांपरयतीतिया
सातं पक्षेसर्वेकामाःवासर्वेषांकामाःवासर्वेस्यशिवस्यकामायेनयस्मैयस्माद्यस्यया
स्मिन्नितिसर्वेकामः श्रीरामस्तंददातीतितं। पक्षेसर्वैः काम्यतेप्राप्यतेयच्छाविषयी

क्षिपतइति सर्वकामोरामोऽनुपादेयतइतिसर्वकामदातृत्वं यद्वासर्वकामःसर्वगंधःसर्व
रसइतिश्रुतिप्रतिपादितपरब्रह्मश्रीरामदातामित्यर्थः एवंरत्नाविशेषणाभ्यामुपाय
सौकर्यमुपपाद्यमिदानीमुपेयातिसुलभत्वप्रदर्शनानिविशेषणानिनिर्वक्ति श्रीरा
मंध्यात्वेति श्रीरामशब्दस्यानेकार्थत्वात्तेषांचवक्तुमशक्यत्वाच्चत्वारोर्थाःश्रीरामायणो
धिकृत्यप्रयुक्तास्तेचातिरमणीयत्वं १ ब्रह्मत्वं २ राज्यदत्वं ३ राक्षसांतकत्वंचेति ४ त
त्रातिरमणीयत्वमयोध्याजनकपुरवासिनोभावयंतिपथाश्रेयोरमणसामर्थ्यात्सौंद
र्यगुणसागरात् श्रीरामइतिनामेदंतभाषणोवक्षणेगितज्ञवहुज्ञकृतज्ञसर्वज्ञध
र्मज्ञताद्यंतःकरणगुणैरंजितचित्तहत्तयोनिर्मथनीभूताइति ब्रह्मत्वयात्रषयोभावयं
ति रमंतेयोगिनोनंतेसत्यानंदचिदात्मनि इतिरामपदेनासौपरंब्रह्माभिधीयतइति
तेजोमयानंदसंदोहघनीभूतपरतरात्मासिपथिगतावलोकनसमयेविक्रीतमनस्का
श्राशक्ताश्रपाररूपवारिधौनिमज्जतयोगवैराग्याविवशाद्दृश्यंतेश्रीरामायणेतथा

हि तेतं सोमम्मिवोधं तं दृष्ट्वैव धर्मचारिणः मंगलानि प्रयुंजानः प्रत्युग्र हल्लनं दृढव्रताः ।
ऊचुः स्वरं तितमाव यं राजन्भवद्विषयवासिनः नगरस्था वा वनस्था वा त्वं राजा जनेश्व
र इति आर्षव्याघ्रो ह्युक्तः राक्षसांतकता चक्रुः टवसर्पनखायरघुषणादिहतांते
तितेजोमयताल्पलावण्यमद्रमसःणानैपतंगाइवाघ्रक्तामुक्ते वैरिखड्गयो विस्मितोय
क्रमाः रामदत्तचित्तामत्तामुक्तिभाजो बभूवुरिति राज्यदत्तं च सुग्रीवविभीषणांगद
द्विराजदानेरनेकराज्यवंशस्थानैः स्फुटतरं प्रपंचरणमरतिजनकता चतुर्षिषष्ठिसि
ह्रायथायोध्याजनकपुरजनमुनिराक्षसराजानो रमंते तत्तपैवं पासनारहस्यमुपास्य
गुणोत्कर्षो वैचित्यापादकोऽयं कोऽप्यनिर्वाच्यगुणास्य रूपः यथा आत्मारामाश्च मुनयो
निर्ग्रंथा अप्युरुक्रमे कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरिति अहमस्याश्वरोत्रा
तालस्मणोनामनामतः कृतज्ञस्य बहुज्ञस्य गुणोदीसमुपागत इत्थंभूतगुणागा
रामरूपमोहोऽमहतुणां तयोगोकृत आचार्यैः कामादीन्पंचतत्तस्मिन्बाधकानि

रा०र०

१३

अत्रतुसाधकानिकामाक्षिप्प इतिव्यासादिरहस्यंविश्रामधामरामंमनोहरम् नीलोत्पल
श्याममिति समुदायसंदिष्टः प्राक्तात्रवयेवप्रवर्त्ततइतिन्यायान्नीलोत्पलसंवर्णश्याममिम
लन्पष्टिचित्ररूपादेकदेशइतियोगंपसरससुगंधावकाशकांतिपावनाद्युपमानगुणा
उपमेयेत्वनुसंधानायनीलोत्पलोपमाराजीवलोचनमिति राजीवमारक्तपद्मंतद्वदारक्ते
लोचनेयस्यसतं राजीवोपमयात्रारक्तलोचनाभ्यामभक्तेद्वेषापूरितेवाभक्तरागरंजिते
अनुरागिनेत्ररागरक्तेरंजितइतिप्रसिद्धः पद्मसामुद्रिकोक्तलक्षणोपेतयथास्कांदेः प
द्मपत्राभनेत्रेलोचनैः सुखभोगिनइति सर्वत्रसुखभोगप्रदकलक्षणेलोचनेयस्यसमस्त
मठराजीववन्नहीडकमलेलोचनेसंरक्षणायतदुन्मुखेयस्यसतं जानकीलक्ष्मणकटंम
कितमिति वटक्षीरस्नेहेनाकुंडलककलापोवेणयाकारेजटापाक्षेनोद्यतेतस्यकलाप
स्यमुकुटेमुकुटाकारः सन्निवेशः शिरस्याविष्टनंतेनमंडितंकेशसमूहेनमुकटशोभा
यस्यसतं सासित्रेणेति सहासित्रेणाभ्यांवर्त्ततेयः सः सासित्रेणः धनुर्बाणोपाणौवायं
स्यसोधनुर्बाणपाणिः सासित्रेणश्चासोधनुर्बाणपाणिस्तं सासित्रेणधनुर्बाणपा

रामः

१३

णांनक्तंचराणांत्रिचराणांराक्षसानांतेषामंतकस्तंनक्तमित्यन्वयंपराणांत्रैनक्तंचरेतिराक्षसेरूढिः
स्वलीलयेति स्वस्यलीलाफलंजगत्त्राणंचभावीतिकृत्वाविर्भूतमभिव्यक्तंनतूत्पन्नंयतो
जंवक्ष्यमाणंनजायतइत्यनेनान्यपिहद्वापरपादयोनिरस्ताविभुमित्यनयाविशेषण
सामर्थ्यासहितोप्यजत्वव्यापकत्वनिर्वाहकोपलक्ष्यात्वेति ननुनानालंकारालंकृता
भिषेकवाल्यकौमारकैसाराभिव्यंजकावस्थाभावना विहायकिमितिजटामुकुट
मेडितंवनवासिरामध्यानमभीप्सितंकिंचप्रिवःश्रीरामंवालध्यायतिविश्वामित्रः
किसोरोपासिकोत्तरामायणादशरथवचनंप्रमाणं वालोड्डादशवर्षोयमित्यादि इ
पंचध्यानसंपत्तिःकृताभिपतेतिचेदत्रोच्यते नहिश्रीरामस्यसर्वावस्थासुजटाधा
रणंदृश्यते नचोपासकैःसर्वथाएवमेवध्येयःकिंतुरक्षापोठध्यानविशेषोयम् यथा
श्रीकृष्णेवेणुवादनेमारुतेःद्रोणागिरिधारणेलंवोदरस्यलड्डुकंश्रीनृसिंहस्योग्ररू
पं तथाजटाधारणंध्येयं ततद्वारेनेध्यातृरक्षणात्तरातिप्रायद्योतनायेवंध्येयरूपित
येवभाव्यं अत्यंताद्दहृदयतयास्य संवंधिमित्तनमतीवकाहलभरणेवप्रोक्तसंधेयः एम

रक्षेति रक्षणं रक्षा रामबलप्रदा रक्षा रामरक्षा श्रीरामस्य प्रबलं रक्षणसामर्थ्यं तदस्यामस्ति य
द्वा रामस्य बलमेव प्रचुरं वीर्यं विद्यते इति तद्युक्ता रक्षा रामरक्षा तां पठेदिति पाठमात्रोच्चारणेन श्री
रामरक्षासिद्धिरूपानन्तफलसाध्यं पाठेन संपादयेत् फलानुषंगी तेरक्षायामस्ति रक्षेव वस्तु
यं साध्यानन्तु साध्यवती तात्पर्यः यद्यपि प्रथमान्वयप्रयोजनायां सहेतुककरूपानुसंधानं शास्त्र
स्थितत्वबुद्धिप्राणप्रतिष्ठामंत्रादयस्संगतास्संपादनाय ध्यानस्य योग्यता प्रयोजनायोप
स्थिताः यदि च निर्हेतुककरूपा समावृणोत्तः करणेनिर्विघ्नं तद्वेयोजनार्हेतुमिच्छतीय चे
ति च कोऽपायपर्यपि यदि चेत्सर्वभयं हन्तुमिच्छेत् तदा यत्नतो यत्नविनेव श्रीरामं ध्यात्वा श्रीराम
रक्षां पठेदिति यत्नानिभूतत्वमुद्रा दीनि तन्निरपेक्षत्वात् केवलं देशानियमरहस्यादिना। राम
नीलोत्पलश्याममिति विघ्नाघ्यनासमुदायं ननकोऽपि ध्यानक्रमोपदेशो यतोऽग्रम्बिर इम
इत्यत्र अग्निरश्वारम्य पादान्तं शिखनखं वस्तमालोसर्वमनवद्यं यच्चु मानवामो लितावर्णाः
देवाश्चरणात तत्यप्ति शिखन खन खशिखवाश्व ब्राह्मणमानवदेवादिवर्णानिक विस्तं
केतः सनात्र पूर्णाकनीयः अस्य स्तोत्रस्य रक्षात्वात् वज्रपंजरनामनामकरणात्तयाराम

कवचंस्मरेत्इतिकवचधारणेननखशिखंशिखनखंवापपघेतेत:सामान्येननाममंत्रा
णांन्यसेनश्रीरामस्यशिखनखमंत्रानुसंधेयम् ध्योक्तस्यारंभस्यसर्वकामदामित्यंतेनग्रं
थसंदर्भेणश्लोकत्रयान्वयैकत्वसंगत्यापादनेनकुलकादिविंशुष्यणाविशेषणवध्य
संखलासंमिलितप्रकरणेश्लोकत्रयेव्याख्यासंग्रहःसंपादितःततश्चश्रीरामेराघवःपा
त्विस्यारंभपातुरामोऽखिलंवपुरिति पंचश्लोकाख्यात्पंत्रमंत्रप्रयोगविधानव्याख्या
नमंत्तेचयथाभक्ताभिवादइवात्मभक्तार्थीनिर्दिष्टेन एतांरामबलोपेतामिति षड्भिनफ
लस्तुतिप्रदर्शनंभविष्यतीतित्रिकांडरामरक्षात्रिपंचपदसंपत्त्याचतुर्दशश्लोकवती
तिश्रीरामार्पणमस्तु इतिश्रीरामरक्षाव्याख्यासंग्रहेप्रथमःकल्पः १ अथप्रयोगः ॐअ
स्यश्रीरामरक्षास्तोत्रमंत्रस्यविश्वामित्रऋषिरनुष्टुप्छंदः श्रीरामपरमात्मोदेवतेत्य
गत्रयं ऋषयोमंत्रद्रष्टारकर्त्तारोवा छंदःपुरिरंभवत्स्येद्वेषोदेवता अथास्यरक्षामं
त्रस्यश्रीराममंत्रार्थविशिष्टत्वान्मंत्रेणैवावशिष्टांगत्रयंकल्पनीयं तथाहिरांबीजंन

मः शक्तिः रामायेति कीलकं चेति रा मिति बीजमाद्यंकारणं हेतुर्नीकारणं बीजं निदानं त्वादि
कारणमित्यमरः नमः शक्तिः सामर्थ्येन मसेवक्ससर्वसंपाद्यं रामायेति कीलकं विनियो
जकं तादर्थ्ये चतुर्थी तत एव श्रीरामप्रीत्यर्थपाठे विनियोग इति लभ्यते इति ऋष्यादि
न्यासः न चावशिष्टांगन्यासप्रयोगोत्र प्रतिपदं गन्यासस्यैवोक्तत्वात् तथा हि ओं
राघवाय नमो मम शिरः पात्वित्यादि क्वचित्पराधीते शिरः पात्वित्यपरत्वं यथा च निमंड
ले सर्वे वंशोत्तमा रघुवंशोद्भवाः सर्वोत्तमास्तद्गतमस्तमो राघवो मम मोत्तमांगं पात्विति स न
परित्यासं सर्वबोध्यं वस्तुतस्तु सर्वेत्राति रहस्ये हेतुकव्यक्तेत् यपादनं दोष एवात्रमति रहस्य
संगोपनीयं सर्वे संमतं रघोरपत्यानि पुमांसः राघवा तेषु श्रेष्ठो रामो राघवः ओं राघवाय
नमो मम शिरः पात्विति शिरसि योजना एवं दिग्न्यासः सर्वांगसंरक्षणालंकृतानं शिरः प्रभृति
पादांतानां भगवति नियोजनप्रार्थनाप्यनुमान्या यथा सर्वमदर्थे कृतोपकारं श्रीराम

माकर्णय कर्णो नित्यं मद्ईनमालाकयनेत्र जिव्हेस्तुहि श्रुतं तगर्जसंदष्टुवानमिति श्रीभ

रघुजकृतवेदपादस्तोत्रांगानामेत्वाभिमुखेन नियोजनमन्यथाप्रत्यवायश्रवणान्निष्प
लत्वेननिंदनंवहीयतेतेनयेनन राणा मित्यन्यत्र विस्तरः प्रकृतमनुसरामः भालं दश
रथात्मजइति दशरथइतिदशेंद्रियाणि रथइवरथोयस्यसोदशरथोजीवः यद्वाद
शतीतिदशः दंशरूपदशनेनधातुस्तेनदशः पक्षागरुडरथोयस्यसोविष्णुर्दशरथस्त
त्स्वरूपः जीवार्थेपक्षेदशरथोजीवदशरथात्मनाजीवात्मनाजायतइतिदशरथात्मज
इति यद्वा स्वर्यवंशजपुत्रोदशरथोराजातस्यात्मजः पुत्रः आत्मजस्तनयस्सूनुरि
त्यमरः यद्वा दशासु दिक्षुप्रतिहतारथगतिर्यस्यसोदशरथस्तस्यात्मजस्तेनपुत्रत्वेन
हतइति दशरथात्मजायनमोमभालंयातिति कौशल्येयाद्दशाविति कौशल्यानाम
श्रेयाध्यायेवंसार्द्धद्वयप्रयोजनप्रमाणेनमाववमंतसंज्ञिकाराजातस्यापत्यंस्त्रीकौशल्या
ज्येष्ठाकन्याकनिष्ठासुमित्राकौशल्यायाअपत्यंपुमान् कौशल्येयः तयाप्रियाचित्तं
त्वयामेपुत्रत्वेनभवितव्यंस्वयंचकृत्येवांगीचकार तथांकौशल्येयायनमोमदशाया

त्विति विश्वामित्रेति विश्वस्य मित्रो विश्वामित्र इति मित्रे चर्षौ इति दीर्घः विश्वामित्र:
प्रियापस्य विश्वामित्रस्य वा प्रियस्तस्मै विश्वामित्रप्रियाय नमो मस्त्विति कौशिकपालि
ति घ्राणमिति मखत्रातेति मखस्य त्राता मखत्राता मखाद्धितुभक्तादाविभेप दशार
थंपितृत्वेन प्रकल्पितेन पुत्रेण हृत इति तत्संकल्पपरत्वेन त्रातेति मखत्राता इत्य
मेधयज्ञफलस्वरूपानुभवानंददातेत्यर्थः यज्ञमखस्य त्राता मखत्रातेति विश्वामि
त्रयज्ञस्य त्राता तेन शिष्यत्वेन हृतः स्वयमंगीकृतवान्ततो बलातिबले विद्ये धीतवा
न् यज्ञमखत्राता मखत्रातेति राज्ञो जनकस्य धनुर्यज्ञनिमित्तभूतेत्त स्मिन्नेन हृत
स्तत्याकरणादित्यर्थः यज्ञमखेन यज्ञेन हेतुभूतेन त्राता यजमानपालः यज्ञसंभारस्त्रे
न पूजितस्त्रातेति यज्ञाज्ञानयज्ञस्तपोयज्ञो द्रव्ययज्ञ इत्यत्रैवं बहुविधा यज्ञा वित
ता ब्रह्मणो मुख इत्यत्र यज्ञशब्दस्य ओमकोपपदत्वात् देनकधात्वं यज्ञस्य मखापरपर्या
यस्यानकधात्राणां कर्तातो मखत्रातेन नमो मे घ्राणं घ्राणस्याधिष्ठानं नासिकं पात्वि

ति ५ सुखं सौमित्रिवत्सल इति सुमित्राकृताभिषेका राज्ञीकृताभिषेका सुमित्रेति श्रीमद्रा
मायणे योध्याकांडेऽपि श्रीरामवचनादेव धार्ष्ट्यं तथाहि दिव्यनाटकमप्यवोचद्युवराजो म
वाप्नुहि मिति श्रीरामवचनेन कौशल्यां प्रति त्वमन्वहं त्रैविवाहितासि ममाभिषेकः सु
मित्रया सह भवत्तु तदस्य शापं जातइतिगाथा कौशल्या च पश्चात् सुमित्रावचनेनानी
य परिणीतेति किंवदंति कौशल्या सुमित्रे भगिन्यौ भानुमंतसुतेइत्युक्तं जन्मना ज्येष्ठा कौ
शल्या नारदवचनेनावत्तार अप्रसंगलाराव लोहल्या समुद्रे निक्षिप्ता साच सामुद्रिके
स्तरंगैरुह्यमाणा केनचिद्दशरथेन राज्ञा समानीय पालिता ततः सुमित्रा विवाहे अभिषे
क समये ऽभवत्तदा कौशल्या नन्दा सुमित्रा दृष्टेति कौशल्यातः सुमित्रा राज्याभिषेकरी
त्या ज्येष्ठा जन्मना च कनिष्ठेति परिवित्तादिदोषादेवगत्या न जातइति संतोष्टव्यम् त
स्याः सुमित्राया अपत्यं पुमान् सौमित्रिर्वत्सलो यस्य सः सौमित्रिवत्सलः यद्वा सौमित्रे
र्वत्सलो रामस्तस्मै सौमित्रिवत्सलाय नमो मम सुखं पात्विति ६ जिह्वां विधत्ति विधानं च

र.र॰ र्मस्थानानां निधिस्तानि याज्ञवल्क्योक्तानि यथा पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रि
ताः वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति विद्यानिधये नमो नमः जिह्वा रसग्राह
१८ करसनेन्द्रियाधिष्ठानं पात्विति ७ सप्तमंत्रात्मशिरऽस्त्यारभ्य जिह्वामित्यंतमुक्तमांगेनि
विष्टाङ्गत्ववांतरप्रकरणे मंत्रव्यूहन्यासस्ततः कंठादारभ्य सप्तव्यूहो नाभ्यंतं निमिष्ट
स्ततः कटितः पादांतो द्वादशाक्षरान्वितस्त्वेतो यो मंत्रव्यूहो मंत्रविद्भिर्निविश्य इत्ति रहस्यं
कंठं भरतवंदित इति भरतेन वंदित इति सद्वयास्येत्युक्तिरियं रामो दशरथात्मजो जनक
जामाता भरतभ्राता वशिष्ठविश्वामित्रशिष्यो महद्गांधर्ववेत्तत्वज्ञैर्भरतैर्वंदितस्तथा च
श्रीमद्रामायणे गांधर्वे च भुवि श्रेष्ठो बभूव भरताग्रज इति भरताग्रजविशेषणाद्भरतो
गांधारदेशजातायां मातर्युत्पन्नस्तद्देशधर्मविशेषज्ञश्चार्थाद्गांधर्ववेत्तत्वज्ञस्तेन वंदितः
स्वरसुधासरससारसंलापेति कमनीयकोमलकोकिलकूजितादप्यतिशयरसासार रामः
धरधाराधरध्वनादिकं तद्वत् श्रीभरतवंदिताय नमो नमः कंठग्रीवामात्रं पात्विति ८ स्कंधा १८

विति द्विविधं वदिव्यं त्र्यायुधं दिव्यायुधं दिव्यैस्तु पलक्षणम् दिविभुविचांतरिक्षे चायुधं
यस्य सतथा पद्मा दिव्यसायुधम स्त्रवलं यस्य सतथोक्तः अस्त्रवलं चोक्तं एतदस्त्रव
लं घोरं मम वाह्यं पवकस्यचेति पद्मादिव्यं कामायुधं धनुर्यस्य वाणाकटाक्षसंपत्तिरिति
विभावयामायथाकामधनुषिसंधताः कामवाणाविषयसुखमायादयंति तथा राम
युधसंधानात्स्पष्टावाणानिर्वाणसुखमावहंति तदुक्तं तदस्त्रं तस्य वीरस्य स्वर्गमार्गप्र
भावनं रामवाणस्य नाक्षिप्तमाहत्य परमां गतिमिति दिव्यायुधो रामो मेरुस्कंधो भुजशिरो
देशोपात्तेति दिव्यायुधायनमः इत्यत्र श्रीरामस्य स्कंधसौष्ठवं ध्येयम् सिंहस्कंधवृ
षस्कंधवहुन्नतस्कंधाद्येपा दिव्यायुधेनेतिज्ञेयम् भुजो भग्नेशकार्मुकइति ईशस्या
तिवलस्य शिवस्य सहस्रभुजविंशतिभुजगुरोः कार्मुकं कर्मेणा महतापि तेन नारायणपि तु
प्रांवसमात्तगवमीशकार्मुकं भग्नमीशकार्मुकं यस्मिन्निमित्तभूते रामस्य भग्नेशकार्मु
कः अत्र धनुः स्वयमभज्जत् तदुक्तं नाटके तद्ब्रह्ममात्रवधपात किमन्यथा रिसंत्रा

तकारिकरसंगमपापभीत्यारोपांधनुर्निजपुरश्चरणापन्नंनंदहंमुमोचरघुनंदनपा
णितीर्थंइति पद्मभग्नईशकार्मुकोपनिमित्तभर्त्तेनेति श्रीरामस्याक्लिष्टकारि

त्वंस्फुटमिति भग्नशार्ङ्गकार्मुकोपनमोमभुजौपाविति १० कौ॰ सीतापतिरिति ई
षांलांगलदंडःस्यात्सीतालांगलपद्धतिरित्याद्यभिधानेन श्रीवाल्मीकिनाम
हर्षिणाकासीतात्पन्नेतिसीताभिधानात्सात्रत्रैवोत्तहिपदापत्तायत्तेत्रशोध
नेराजाजनकोवेदहिकपोरोहित्यादिराज्यसंपत्तिमुपादायशुक्लांबरःप्रिर
स्नातोवासोलंकरणामंडनैर्मंडितमात्मानंकृत्वासुवर्णहलफालकद्वालदा
त्रेयोक्तकरणकैःकेदारकर्षणकर्मणिक्षपिकारवदतिनिधिर्भांडमलभत्
तस्मात्कन्यारत्नमवाप्यानंदनपुत्रशतलाभादप्यधिकं मन्यमानोमहन्म
हात्सवानंदगीतवाद्यादिभिर्मंगलैः तस्मात्कन्यारत्नमवाप्यानंदनपुत्र
शतलाभादप्यधिकं मन्यमानोमहः" स्वस्तिवाचनपूर्वकैर्नांदीमुखादि

आह्य द्विजातकं कृत्वा तां पुत्रित्वेन पालयामास स चानुदिनं वर्द्धमाना चंद्रका
लेव कतिपयदिवसैः सार्द्धत्रिवर्षैर्वाहृप्रपत् तयाकपापिलालया धनुरुत्थापा
न्पतस्योनधनुरितिहृष्टा राजा वीर्यशुल्केति नाम चकार पणं च कृतवान्
यो धनुरुत्थापयपरपेत्सोस्यापतिरितिमेदिनीवाघेरवादयन् द्वीपद्वीपांतसं
प्याख्यापयामास सेयं सीता तस्याः पतिः पाणिग्रहणे प्रोक्तकन्यकापितृ
वचनेन करणहोता तथोक्तं इयं सीता मम सुता सहधर्मचरी तव प्रती
च्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिनेति सीतापतये नमो मे करेपात्विति हृद
यं जामदग्नीति जमदग्निरपत्यं तत्र तपांतकारकां प्राविवतारो महर्षिमौलिमणिस्तं ज
पतीति तत्पास मे हृदयं मनश्चंचलतां स्वांतं हृन्मानसं मन इत्यमरः हृदयं गंभीरपर्य
र्णोवा घतपरशुपाणिं धनुर्बाणधरं परशुरामं वचनरचनयैव जितवान् अनेन श्रीरा
मे वतारत्वमनेनावतारित्वं प्रवदंति हृद्याः तस्मै जामदग्निजितेन नमो मे हृदयं पा।

रा०र० त्विति १२ मध्यमिति खरध्वंसीति हृदयादधोभागो नाभ्यूर्ध्वंदेशः शरीरावयवो मध्य
१९ शब्देनोच्यते खरो दूषणभ्राता चतुर्दशसहस्रसंख्याकराक्षसपतिर्भरतखंडमध्य
मध्यास्तस्मात्तस्यध्वंसोऽभावविशेषस्सादिरनंतोनाशः सोऽस्यास्तीतिसतस्मैखर
ध्वंसिनेनमो मे मध्यंपात्विति १३ नाभिंजाम्बवदिति जांबवान् ऋक्षात्मजोनिजंभो
द्भवो ब्रह्मांशस्तपावतीर्णःपरमेष्ठीपरब्रह्मविद्यानिधिःऋक्षराजोतुवलनिधिः श्री
रामावतारेप्येतस्याश्रयआश्रयपदंतोनिवासइतियावत् यद्वाजाम्बवानाश्रयो
ऽतिप्रियसचिवतयानिस्पृहमंत्रकार्थीयस्यसः यद्वाजांबवान्आश्रयः सर्व
देवानरादिभक्तत्वादाधारःप्रथमोपात्तात् उक्तं हि ब्रह्मणा सर्वे समुदायं प्र
तिप्रपिसांममावर्त्ताराजातइति एवमेवमयास्पृष्टोजांबवान् ऋक्षपुंगवः ममव
क्त्रात्महसाज्जंभमाणस्यजापतमवह्निरपिसेसिरंघोरवतरतव्यमिति श्रीरामोजां रामः
ववदाश्रयवान् तस्मैजांववदाश्रयायनमोमेनाभिंपात्विति अवांतरप्रक १९

रणोद्वितीयोमंत्रसप्तकः ४४ सुग्रीवेति शोभनाग्रीवायस्यासौसुग्रीवः सुष्टुखेद्
तियावत्सुग्रीवस्यशोवासुग्रीवईशायनसःसुग्रीवःसंखतुल्यग्रीवः कंबुग्रीवश्च
न्पतिल्लेस्वकर्णेतिभाषणाइतिलक्षणं रेखात्रयान्वितग्रीवाकंबुग्रीवेतिकथ्य
तेइतिहलायुधः सुग्रीवश्चाव्हः कंबुग्रीवापरपर्यायः सुग्रीवेशायनमोमेकरिंपा
त्विति २५ सकर्ष्यीति हनुरस्यास्तीतिहनुमान्सर्येग्रासकौतुकेवामोहनुरभज्य
तइति ब्रह्मणाकृतनामधेयोहनुःकपोलोपरिभागः अधस्ताच्चिबुकंगंडक
पोलौतत्परोहनुरित्यमरः हनुमतःप्रभुर्वाहनुमान् प्रभुर्येनसस्तस्मैहनुमत्प्र
भवेनमोमेसर्वधीपात्विति २६ हनुमत्प्रभुरित्यत्रसप्तमश्लोकांकस्तदग्रेमत्रा
कस्यादिमोद्वैश्रीरामरक्षापरिपर्येविन्मस्कारिविद्यारणपकाष्ठजिह्वोपनाम्ककै
करूरघत्तमःपातुरक्षःकुलविनाशनइतिपाठोनिवेशितस्तत्पक्षेः रक्षाश्लो
कस्यचतुर्दशएतस्मिन्निवेशेसंहितानियमभंगःपुनश्चरक्षाश्लोकेषुसविप्रांश

रा°२०

षणपदंनयति अत्ररघत्तमरत्तः कुलविनाशनयोर्मध्ये किंविशेष्यं किंवाविशेष
णपदमित्यत्रैषैवनियामिका अपिचकोष्टेः सहैकविंशत्यादिपंत्रघटनापिदुःस्था

२०

प्या अस्मिन्संकेतेतु श्रीमद्रामोपासिकाग्रगण्येनमुद्गलभट्टोपितेनापि पंचश्लो
कीव्याख्याप्रतिज्ञायसाद्धं पंचश्लोकव्याख्याकृतातु तिविंदांकुर्वंतु विद्वांसः जा
नुनीसेतुकृद्विति निरूपपदसेतुशब्देनधर्मसेतुर्मर्यादासेतुसमुद्रसेतवादयः सं
गृह्यंतइत्ति उक्तंहि भयेपोभयोभाविनोभूमिपालान्नत्वानत्वायाचतेरामचंद्रः सु
ठेष्टोऽपधर्मसेतुर्न्नराणांकालेकालेपालनीयोभवद्भिरिति सेतुकृतेनमोमेजानु
नीपात्विति १७ जंघेइत्ति दशमुखादशास्योविंशत्तिवाहुरावणोराक्षसोवादश
मुखमहामोहस्तस्यांतक उक्तंहि दशेन्द्रियाननंघोरंयोमोहरजनीचरम् विवेक
शरजालेनशमेनपतियोगिनामित्तिदशमुखांतकायनमोमेजंघेपात्विति १८ वि
भीषणइत्ति विभेत्यस्मात्स्मावाविभीषयतिकामादीनि विभीषणस्तस्मैत्रिपं

रामः

२०

लंकाराज्यंददातीतिविभीषण। श्रीरक्तस्मैविभीषण। श्रीदायनमोमे पादौपातिति
१९ पातुरामइति श्रीरामायनमोमेअखिलंवपुःपातित्यत्रविंशतिमंत्राख्याता
व्याख्याता एकविंशश्चानुदितोयंत्रोद्धारेलिखितमस्तितयोश्चैकविंशमंत्रैःसयं
त्रारामरक्षाराजतेयस्य अत्रश्रीराममंत्रापौल्लेखउक्तितस्तथाप्यत्रयंत्रोद्धारः
प्रथमंलिखेत्नैवक्तस्यवधावकाशतान्नाममंत्रार्थसंग्रहोभविष्यत्यग्रेरामकल्लो
पेतामित्यत्र अथश्रीरामरक्षायंत्रक्रमोगस्तिसंहितायाम् वक्ष्यामिरामचंद्रस्य
यंत्रंकवचसंज्ञितं धारणाज्जस्यमर्त्यानांजायतेसर्वसिद्धयः नश्यंतिसर्वपापानिविप
दोयांतिसंक्षयं भूतप्रेतपिशाचाद्याःपलायंतेचदर्शनात् मित्रताण्स्थिरतां
यांतिशत्रवोयांतिमित्रतां ग्रहाःप्रसादमायांतिदास्यंयांतिमहीभृतः किमत्र
बहुनोक्तेननास्त्येतेनसुदुर्लभं यंत्रेणरामचंद्रस्यवज्रपंजरसंज्ञिना कोष्ठैःसहे
कविंशत्यायेत्तिद्धयविभूषितं विन्यसेद्वृत्तमंचक्रमेतस्मिन्कवचंलिखेत् इद

रा॰र॰ प्राक्स्वर्णेष्वगृह्णीयात्तेषु विन्यसेत् अनुलोमविलोमाभ्यां प्रागदक्षिणक्रमेण च राघ
वादीनि नामानि नमस्कारेण योजयेत् मशिरः पात्विति वस्यात्सर्वतो वाक्ययोजना सा
२१ ध्याख्यासंप्रत्ताय षष्ठी स्वाहेत्येकादशार्णेह स्वकामशक्तिवाग्वर्णैर्नारसिंहमतः परम्
लक्ष्मीपाशाङ्कुशाणीनिवारणं हं फट् स्वरूपकं स्वाहेति रामभद्रस्य द्वादशार्णान्तरमीरितं
सौवर्णे राजते पात्रे भूर्जे वा सस्पृगालिखेत् अथवा ताम्रपत्रे च गुलकौ हृत्प धारयेत्
यावज्जीवं तु सौवर्णे रौप्ये विंशतिवार्षिकं भूर्जे द्वादशवर्षाणि तदर्धं ताम्रपात्रके
एवं लिख्य विशेषेण यंत्रशक्तिः प्रतिष्ठिता एतां रामबलोपेतामित्यादि श्लोकपञ्चकं
यंत्राद्बहिः प्रदेशे तु वृत्ताकारं यथा लिखेत् सर्वदुःखोपशमनं सर्वोपद्रवनाशनं आ
पुरारोग्यमैश्वर्यं पुत्रपौत्रविवर्द्धनं सर्वान्कामानवाप्नोति विष्णुलोकं स गच्छति अ
स्यार्थः वक्ष्यामीत्यारभ्य वज्रपंजरसंज्ञिनेत्यंतस्य षट्सु दक्षिणोत्तरे रेखात्रयस्योपरि रामः
प्राक्पश्चिमाग्रे रेखाद्वादशकेऽपि तु द्वाविंशतिकोष्ठकानि भवंति अंतिमकोष्ठ २१

रूपमघोरस्यापाकरणाय एकविंशतिभिः सार्धपंक्तिरूपविमर्षितमुत्तमं चक्रं विन्यसेत्
तत्र श्रीरामकवचं विलिखेत् तद्यथा। द्वादशाक्षरमंत्रवर्णानां मध्ये एकैकेन गणयेद्वा
पनमोमध्यस्यालितियोजितं संपुटितमेकैकस्मिन्कोष्ठके प्रादक्षिण्येन लिखेत्
एवमुपरितानां दशपदानां समावेशः एकादशकोष्ठे द्वादशपूर्वैरितं वर्णरूपं ततः
श्रीमुकस्य तत्तोरक्षामध्ये पार्श्वयोः क्रमेक्रमेण तदेव वर्णरूपं विपरीतं लिखेत् एवमे
वकोष्ठानां विनियोगः तदेवं द्वादशवर्णात्मकं मंत्रं दर्शयति सत्यादिना. सोवर्णे
उत्पादिमंत्रभक्तिः प्रतिष्ठितेस्यंतं शेषस्य तत्र यावज्जीवमित्यादिश्लोकमंत्रेकंतत्
सर्वयंत्रसाधारणं एतामित्यादिश्लोकषट्कं यंत्रा द्विद्विस्थले हतं यथा भवति तथा
लिखेत् शेषं स्पष्टं न संति गुरवो यस्यैनवर्हिता विधिक्रमः रामरक्षापठनेन फलं तुल
सीदलमर्पयेत् दीक्षांतरप्रोतेनापि नित्यफलमवाप्यते इत्यागस्त्येनोक्तत्वात् राम
रक्षासमं न हि प्रादक्षिण्यक्रमेण च इति चकारः समुच्चयार्थः ग्रंथांतरोक्ते इत्यष्टं

रा०र० सोहं पंत्रस्य जीवः स्यान्मध्यबीजाद्धोन्यसेत् हंसः सोहमिति प्राणो उपप्राणादिक्रमाल्लिखेत्
रं रं नेत्रन्यसेत्पार्श्वे ओं श्रोत्रे तथैव च विप्रोपोष्टदलादेस्तु गायत्री लिखेन स्फुटः पंत्र
२२ राजाय विद्महे वरप्रदाय धीमहि तन्नो पंत्रः प्रचोदयात् इत्येणो मंत्र गायत्र्याः प्रति
पंत्रविशेषाध्यपेत् अग्नेपयपावकोशेन प्रतिष्ठां प्राणदां लिखेत् इति यंत्रोद्धारः अथ यं
त्रचक्रन्यासः अथ श्रीराममंत्रार्थो विहुधा वहुभिराचार्यैर्विहुतं त्रैवेर्णतत्र स्तद्वष्टोस
पत्तयालंवहिरववरिष्टात्स्मा श्रीरामानुजाचार्यकृतकारिकाद्वयो परिकेन विन्नवि
नेन श्रीमदष्टाक्षरार्थोब्रसोरणपडक्षरव्याख्या संगृहीतास्त्वास्माकं मनुकूलाय
तोपंक्व्याख्यासंग्रहः स्पष्टएकतन्मंत्रार्थोपप्या ० सच्चिद्रूपगुणोस्वरूपविभवैश्वर्यैक
दिव्यांवपुर्नित्यानंदगुणानुभावकरुणासौंदर्यशुद्धोदधिः त्वंपंतप्रत्तिपाद्यवस्तु
घटनेकर्तास्वतंत्रः स्वतोभ्रातश्चंडकराम्बयेविजयेत श्रीजानकीशोविभुः १ अयो रामः
ध्यानगरे रम्ये सर्वलोकस्य कारणे रमया सहितो रामो ध्याते भागवतैः सह २ जान २२

कोजागतामिशूंगां नित्यंप्रेषानपायिनी विमलादिशक्तिसंयुक्ता भगवंतमुपासते ३ ३
स्फुरत्करात्मात्रयोध्याधिपतिः तस्यां दिव्यमहामणिमंडपकल्पवृक्षच्छायायां शेषकशिपु
पर्य्यंकेसुखासीनः ब्रह्मेशानारदादीनां वाङ्मनसापरिच्छेद्यस्वरूपरूपगुणविभवै
श्वर्यस्वभावः नित्यैश्वर्य्यविप्रहानंतगरुडविश्वक्सेनादिपरिचीरितचरणयुगलः
स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजः सौशीलवात्सल्यमा
र्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्य्यगांभीर्य्यौदार्य्यस्थैर्य्यधैर्य्यपराक्रमसत्यकामस
त्यसंकल्पकृतित्वकृतज्ञताद्यसंख्येयकल्याणगुणगणौघमहार्णवः सर्वेषांचेतना
नांस्वशेषत्वाविशेषेणस्वरूपगुणानुभवजनितानवधिकातिशयप्रीतिकारिताशेषा
वस्थोचिताशेषशेषतैकरतिरूपचरणारविंदनित्यकैंकर्यारसपरमपुरुषार्थोनुभ
वेयामपत्तासम्हावप्पनादिकर्मप्रवाहनानारिमापयावित्तसमानाकारान्संसारतोज्जी
वान् त्रिगुणात्मकप्रकृतिनिमग्नान् भोगमोक्षसस्पृहान् श्रीचिद्दिष्टिप्रदानवलोका

ए.र०

२३

त्यंतद्रूपादिचित्तःसन्मात्राद्वैकं व्यापकः श्रीमद्रामोनित्यविभूतिविशिष्टं दशरथपि
त्रत्वेनप्रकल्प्यभूलोकेचक्रोपरिकृतेनायामयोध्यायामवतीर्यरावणादिहननद्वारेण
सकलपापमस्तंतत्रनामपिनयनविषयतांगत्वाखिलत्वतमोजितोविषयाजानकी
रूढ्यागत्स्यपरंपरयावनितलेइदं मंत्रब्रह्मतारकंप्रप्रापामास उक्तंचहारीते इममे
वपरंमंत्रंब्रह्मरुद्रादिदेवताः ऋषयश्चमहात्मानोमुक्ताजप्त्वाभवांबुधेः एतन्मं
त्रमगस्त्योवैजप्त्वाद्रत्वमाप्नुयात् ब्रह्मत्वंकाश्यपोजप्त्वाकौशिकस्त्वमरत्वतां का
र्तिकेयमनुश्चैवरुद्राद्यार्कगिरिनारदाः वालखिल्यादिमुनयोदेवतात्वंप्रपेदिरे इम
मेवजप्त्वामंत्रेरुद्रस्त्रिपुरदाहकः ब्रह्महत्याविनिर्मुक्तःपूज्यमानोभवत्सुरैः श्रुया
पिरुद्रःकाश्यांतुसर्वेषांत्यक्तजीविनां दिशत्येतन्महामंत्रंतारकंब्रह्मनामकं त
स्यश्रवणमात्रेणसर्वएवदिवंगताः इत्युक्तप्रकारेणपरमपुरुषार्थसाधकत्वात्परं
परागतमपितदर्थज्ञानेनविनाप्रवृत्त्यसंभवात्ततोभगवान् श्रीमद्भाष्यकारास्मिं

रामः

२३

तारकेतत्वमिहतत्पुरुषार्थप्राचोदकसत रकारार्थो रामः सगुणापरमैश्वर्यजलधिर्मकारा
र्थोजीवः सकलविधिकैंकर्यनिपुणस्तयोर्मध्याकारो युगलमथसंबंधमनयोरनन्या
र्हत्वंतत्रिनिगमस्वरूपोयमतुलः १ एषात्मकाशाद्भूतंजगतत्रैवसंस्थितंस्थिति
संयमकर्तासौजगतोस्यजगन्मयः २ सएवस्रष्टाः सचसर्गकर्तासएवपात्यत्तिचपा
ल्पतेच ब्रह्माद्यवस्थाभिरशेषमूर्तिर्विष्णुर्वरेण्यावरदोवरिष्ठः अहंसर्वस्यजगतः
प्रभवः प्रलयस्तथा एषएवहिलोकानांउत्पत्तिस्थितिकारकः एवंभूतोव्यापनशी
लः रकारार्थः श्रीरामः रकारवाच्यः अपमाप्रायः रा आदानेइतिधातोः रातिगृह्णा
तिकर्तात्विश्वमितिरः रादीप्ताविति धातोः रातिप्रकाशतेइतिरः इत्यनेनजन्मक्षे
मादिकर्तृत्वेनरकारस्यसर्वेश्वरत्वंजगत्कारणत्वंचसिद्धं पद्धारमुक्रीडायामितिधा
तोः उकप्रत्ययेरमयतिसुखयतिस्वाश्रितान्स्वेनविश्वमितिरः उक्तंचहारीते रकारमै
श्वर्यबीजंमकारस्तेनसंयुतः अवधारणयोगेनरामित्यात्मामनोः स्मृतः पद्धारमुक्रौ

ए०र०
२४

उमामितिधातोः उवप्रत्यये रमपतिसुखरूपः खादिद्वात्वेनविश्वमितिरः उत्पन्नेनजग
त्पालकत्वंसिद्धं पहारमुधातोः विसर्गार्थत्वंतदा च जगतो रमपति उत्पारयतिइतिरः
उत्पन्नेनाखिलब्रह्मांडानंतापीरंष्ट्रिन्नेऐश्वर्यादिविशिष्टापहतपाप्माविजरो विमृत्युर्विशो
काविजिघत्सोपिपासः सत्यकामेनाखिलब्रह्मांडानंतापीसंकल्पादिगुणविशिष्टत्वं
सिद्धं अयंरकारोयोगरूढः अत्रयोगनजगज्जन्मादिकर्तृत्वात् कर्तृत्वंप्रसिद्धंरूढत्वात्तु
अखंडब्रह्मवाचकत्वंपरब्रह्मवाचकत्वेनप्रधानः सर्ववेदात्मकत्वाच्चसर्वलोकस्या
